# श्रीसोमनाथसंस्कृतयुनिवर्सिटी, वेरावलम्

## सत्रान्तपरीक्षा - एप्रिल् २०१९

| | | |
|---|---|---|
| **कक्षा**-आचार्य-1(SEM-2) | **प्रश्नपत्रम्** - ४ (New & Old) | **गुणाः** - ७० |
| **विषयः** - साहित्यम् (अलङ्कारवर्गः) | **कोड- CC- 426[1]** | **समयः** - ११ तः २ |
| **दिनाङ्कः** - १३/०४/२०१९ | **सन्दर्भग्रन्थः**- कुवलयानन्दः | |

---

**॥ प्रथमान्वितिः ॥** (Unit-1)

**प्रश्नः १ निम्नाङ्किताभ्याम् अलङ्काराभ्याम् एकस्य व्याख्यां कुरुत ।** ०५

१. उक्तिरर्थान्तरन्यासः स्यात् सामान्यविशेषयोः । हनूमानब्धिमतरद् दुष्करं हि महात्मनाम् ॥

२. सूच्यार्थसूचनं मुद्रा प्रकृतार्थपरैः पदैः । नितम्बगुर्वी तरुणी दृग्युग्मविपुला च सा ॥

**प्रश्नः २ निम्नाङ्किताभ्याम् अलङ्काराभ्यां कमप्येकं सोदाहरणं सलक्षणं विलिख्य निबन्धात्मकमुत्तरं लिखत ।** १०

१. प्रौढोक्त्यलङ्कारः ।

२. विषादनालङ्कारः ।

**॥ द्वितीयान्वितिः ॥** (Unit-2)

**प्रश्नः ३ निम्नाङ्किताभ्याम् अलङ्काराभ्याम् एकस्य व्याख्यां कुरुत ।** ०५

१. तद्गुणः स्वगुणत्यागादन्यदीयगुणग्रहः । पद्मरागायते नासामौक्तिकं तेऽधरत्विषा ॥

२. सूक्ष्मं पराशयाभिज्ञेतरसाकूतचेष्टितम् । मयि पश्यति सा केशैः सीमन्तमणिमावृणोत् ॥

**प्रश्नः ४ निम्नाङ्किताभ्याम् अलङ्काराभ्यां कमप्येकं सोदाहरणं सलक्षणं विलिख्य निबन्धात्मकमुत्तरं लिखत ।** १०

१. सामान्यालङ्कारः ।

२. व्याजोक्त्यलङ्कारः ।

**॥ तृतीयान्वितिः ॥** (Unit-3)

**प्रश्नः ५ अधोलिखितालङ्कारयोः एकस्य व्याख्या कार्या ।** ०५

१. वक्रोक्तिः श्लेषकाकुभ्यामपरार्थप्रकल्पनम् । मुञ्च मानं दिनं प्राप्तं नेह नन्दी हरान्तिके ॥

२. उदात्तमृद्धचरितं श्लाघ्यं चान्योपलक्षणम् । सानौ यस्याभवद्युद्धं तद्धूर्जटिकिरीटिनोः ॥

**प्रश्नः ६ अधोलिखितालङ्कारयोरेकस्य निबन्धात्मकमुत्तरं लिखत ।** १०

१. स्वभावोक्त्यलङ्कारः ।

२. हेत्वलङ्कारः ।

**॥ चतुर्थान्वितिः ॥** (Unit-4)

**प्रश्नः ७ कस्याप्येकस्य व्याख्या कार्या ।** ०५

१. बलात्कुरुत पापानि सन्तु तान्यकृतानि वः । सर्वान् बलकृतानर्थानकृतान् मनुरब्रवीत् ॥

२. अभूतपूर्वं मम भावि किं वा सर्वं सहे मे सहजं हि दुःखम् ।
किन्तु त्वदग्रे शरणागतानां पराभवो नाथ! न तेऽनुरूपः ॥

**प्रश्नः ८ कस्याप्येकस्य निबन्धात्मकमुत्तरं लिखत ।** १०

१. अलङ्कारसंसृष्टिः ।

२. सङ्करसङ्करालङ्कारः ।

**प्रश्नः ९ दशानां प्रश्नानामुत्तराणि लिखत । १०**

१. विकस्वरालङ्कारस्य किमुदाहरणम्?

२. प्रहर्षणालङ्कारस्य किं लक्षणम्?

३. 'अपि मां पावयेत् साध्वी स्नात्वेतीच्छति जाह्नवी' इति कस्यालङ्कारस्योदाहरणम्?

४. यत्र दोषस्य गुणत्वकल्पनं गुणस्य दोषत्वकल्पनं तदा कोऽलङ्कारः?

५. उन्मीलितालङ्कारस्योदाहरणं लिखत ।

६. गूढोक्त्यलङ्कारस्य लक्षणं किम्?

७. 'त्वामालिखन्ती दृष्ट्वाऽन्यं धनुः पौष्पं करेऽलिखत्' इति कस्योदाहरणम्?

८. लोकोक्त्यलङ्कारस्य लक्षणं किम्?

९. अत्युक्त्यलङ्कारस्य लक्षणं किम्?

१०. यत्र प्रसिद्धस्य निषेधः तदा कोऽलङ्कारः भवति?

११. रसवदलङ्कारः कदा भवति?

१२. यत्र एकेन वाचकेन उभयोः अलङ्कारयोः प्रतीतिः भवेत् तदा कोऽलङ्कारो भवति?

१३. प्रत्यक्षालङ्कारस्य कति प्रकाराः?

१४. सङ्करस्य कति भेदाः सन्ति?

१५. अर्थापत्त्यलङ्कारः कदा भवति?

०००